संहतजानुकः,त्रि.(संहतजानुरेव। स्वार्थे कन्।) लग्नजानुकः। तत्पर्य्यायः। संज्ञुः २। इत्यमरः॥ संहतजानुः ३ संज्ञः ४। इति तट्टीकायां भरतः॥

संहतलः,पुं,(संहतं परस्परयोर्म्मेलनं लातीति। ला+कः।) मिलितपाणिद्वयम्। इत्यमरः॥ द्वौ वामदक्षिणौ प्रतलौ संहतौ मिलितौ संहतल उच्यते। प्रतलद्वयं मिलितं संहतलः। स्यादित्यर्थः। संहतं लाति संहतलः हनजनादिति डः। निर्व्विसर्गपाठे द्वौ वामदक्षिणौ पाणी संहतौ मिलितौ चेत् तदा संहतलप्रतलावुच्येते। अस्मिन्नर्थे प्रतलोऽयं चपेटे संहतले च वर्त्तमानत्वात् नानार्थः। इति भरतः॥

संहतिः, स्त्री, (सं+हन+क्तिन्।) समूहः। इत्यमरः॥ (यथा, हितोपदेशे।
"अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥")

संहननं, क्ली, संहन्यते इति। सं+हन+ल्युट्।) शरीरम्। इत्यमरः॥ (यथा, भागवते। ५। २। २१।
"आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बुद्वीपवर्षाणि बुभुजुः॥"
सम्यग्घातनञ्च॥ (कठिनं, त्रि। यथा, भागवते। ५। ९। १०।
"शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः * * * विचचार॥" "संहन्यन्ते निविडीभवन्ति अङ्गानि यस्य। कठिनावयव इत्यर्थः॥" इति तट्टीकायां स्वामी॥)

संहराख्यः, पुं, (संहर इति आख्या यस्य।) पावकनामाग्निः। इति मत्स्यपुराणम्॥

संहर्षः, पुं, (सं+हृष+घञ्।) प्रमोदः। स्पर्द्धा। (यथा, महाभारते। ३। २१८। २४।
"संहर्षाद्धारयन् क्रोधं धन्वी स्रग्वी रथस्थितः।
मन्ये नाशयेत् यत्र नमोघो नाम पावकः॥"
वायुः। इति विश्वमेदिन्यौ॥ (लोमहर्षः। यथा, सुश्रुते। ६। ६।
"दाहसंहर्षतःस्वल्पशोकनिस्तोदगौरवैः॥")

संहवनं, क्ली, सम्यक्प्रकारेणाहुतिः। संपूर्व्वहुधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

संहारः, पुं, (संह्रियतेऽनेनेति। सं+हृ+ "अध्यायन्यायेति।" ३।३।१२२। इति घञन्तः साधुः।) नरकविशेषः। इत्यमरः॥ प्रलयः। इति हेमचन्द्रः॥ (यथा, मनुः। १। ८०।
"मन्वन्तराण्यसंख्यानि सर्गः संहार एव च।
क्रीडन्निवैतत् कुरुते परमेष्ठी पुनः पुनः॥")
संक्षेपः। इति जटाधरः॥ संहरणञ्च॥ (यथा, रघुः। ५। ५७।
"संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्॥")

संहारमुद्रा, स्त्री, (संहारस्य मुद्रा।) विसर्ज्जनमुद्रा। यथा, राघवभट्टधृतम्।
"अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम्।
क्षिप्ताङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत्।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते॥"
अर्पणे आत्मनीति शेषः। इति तिथ्यादितत्त्वम्॥
भैरवविशेषः। यथा,—
"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च।
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः॥"
इति तन्त्रम्॥

संहितः, त्रि, मिलितः। संपूर्व्वधाधातोः क्तप्रत्ययेन निष्पन्नः॥

संहितपुष्पिका, स्त्री, (संहितानि मिलितानि पुष्पाणि यस्याः। कापि अत इत्वम्।)मिश्रेया। इति राजनिर्घण्टः॥

संहिता, स्त्री, सम्यक् (धीयते स्मेति। धा+कर्म्मणि क्तः। यद्वा सम्यक् हितं प्रतिपाद्यं यस्याः।) मन्वादिप्रणीतधर्म्मशास्त्रम्। तत्पर्य्यायः। स्मृतिः २ धर्म्मसंहिता ३ स्मृतिजीविका ४। इति शब्दरत्नावली। संहिताविशेषा यथा,—
"एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम्।
अष्टादशपुराणानामेवमेव विदुर्बुधाः।
एवञ्चोपपुराणानामष्टादश प्रकीर्त्तिताः॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यमुत्तमम्॥
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्।
पञ्चम्यः संहितानाञ्च कृष्णभक्तिसमन्विताः।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च।
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे१३२ अध्यायः॥
अपि च।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम्॥
चतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः॥
ब्राह्मी भागवती शैवी वैष्णवी च प्रकीर्त्तिता।
चतस्रः संहिताः पुण्या धर्म्मकामार्थमोक्षदाः॥
इयन्तु संहिता ब्राह्मी चतुर्व्वेदैः समन्विता।
भवन्ति षट्सहस्राणि श्लोकानामत्र संख्यया॥"
इति कौर्म्मे १ अध्यायः॥
तत्र स्कन्दपुराणोक्तषट्संहिता यथा,—
"स्कान्दमद्याभिवक्ष्यामि पुराणं श्रुतिसम्मितम्।
षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम्॥
आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता।
तृतीया शाङ्करी विप्राश्चतुर्थी वैष्णवी मता॥
तत्परा संहिता ब्राह्मी सौराख्या संहिता मता।
ग्रन्थतः पञ्चपञ्चाशत्सहस्रेणोपलक्षिताः॥
आद्या तु संहिता विप्रा द्वितीया षट्सहस्रिका।
तृतीया ग्रन्थतस्त्रिंशत् सहस्रेणोपलक्षिता।
तुरीया संहिता पञ्चसहस्रेणोपलक्षिता।
ततोऽन्या त्रिसहस्रेण ग्रन्थेनैव विनिर्म्मिता।
अन्या सहस्रतः सृष्टा ग्रन्थतः पण्डितोत्तमाः॥"
इति स्कन्दपुराणे सूतसंहितायां शिवमाहात्म्यखण्डे १ अध्यायः॥

संहूतिः, स्त्री, (सं+ह्वे+क्तिन्।) बहुभिः कृताह्वानम्। इत्यमरः॥

संहृतः, त्रि, (सं+हृ+क्तः।) कृतसंहारः। यथा,
"अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता।
तत् संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥"
इति मार्कण्डेयपुराणीयदेवीमाहात्म्यम्॥

संहृतिः, स्त्री, (सं+हृ+क्तिन्।) संहारः। यथा,—
"विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संक्षयः, पुं, (सं+क्षि+अच्।) नाशः। यथा,—
"रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
प्रलयः। इति शब्दरत्नावली॥

संक्षिप्तः, त्रि, (सं+क्षिप्+क्तः।) कृतसंक्षेपः। संक्षेपविशिष्टः। यथा,—
"समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥"
इत्यमरः॥
संक्षिप्तैः अल्पेनैव बह्वर्थप्रतिपादकतयाभिहितैः। इति तट्टीकायां भरतः॥

संक्षेपः,पुं,(सं+क्षिप्+घञ्।) स्तोकेन भूयसोऽभिधानम्। इत्यमरटीकायां भरतः॥ चुम्बक इति स्वल्प इति च ख्यातः॥

संक्षुब्धः,त्रि,(सं+क्षुभ+क्तः।)सञ्चलनविशिष्टः। इति क्षुभधात्वर्थदर्शनात्। आकुलः। यथा,—
"दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः।
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संक्षेपणं, क्ली, (सं+क्षिप+ल्युट्।) विस्तीर्णानां संक्षेपः। प्रपञ्चकरणवैपरीत्यम्। इति भरतः॥ तत्पर्य्यायः। समसनम्२। इत्यमरः॥ संहारः ३ समाहारः ४ संग्रहः ५ समासः६। इति जटाधरः॥

संक्षोभः, पुं, (सं+क्षुभ+घञ्।) चाञ्चल्यम्। सञ्चलनम्। यथा। "संक्षोभमक्षरयुषामपि चित्ततन्वोः।" इति श्रीभागवतम्॥

सकः, पुं, }
सका, स्त्री } पूर्व्वोक्तपरामर्शकः। से इति भाषा। तच्छब्दस्य टेः पूर्व्वं अकि परत्र आप्प्रत्यये च सति प्रथमैकवचननिष्पन्नं पदद्वयम्॥ (यथा, ऋग्वेदे। १। १९१। ११।
"इयत्तिका शकुन्तिका सका जघास ते विषम्॥")

सकटः, पुं, (कटेन अशुचिना शवादिना सह वर्त्तमानः।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

सकटान्नं, क्ली, (कटशब्देनाशौचं लक्ष्यते तत्सहचरितमन्नं सकटान्नम्। इति मिताक्षरा।) अशुद्धान्नम्। इति केचित्॥ (यथा, याज्ञवल्क्यः। ३। १५।
"आचार्य्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती।
सकटान्नं न चाश्नीयात् न च तैः सह संवसेत्॥"